# Shivanirdishta Shivavandana

# શિવનિર્દિષ્ટ શિવવન્દના

## Document Information

Text title : Shivanirdishta Shivavandana

File name : shivanirdiShTashivavandanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 1 | 189-202||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# શિવનિર્દિષ્ટ શિવવન્દના

યે મુક્તિદાયક મહેશ પિનાકપાણે શમ્ભો ગિરીશ હર શઙ્કર ચન્દ્રમૌલે ।
વિશ્વેશ્વરાન્ધકરિપો પુરસૂદનેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૮૯॥

યે દેવદેવ જગદીશ્વર પઞ્ચવક્ત્ર શ્રીનીલકણ્ઠ વરદોત્તમ વિશ્વબાહો ।
સોમાગ્નિભાનુનયનામલ શઙ્કરેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૦॥

યે શર્વ ભાલનયનાખિલવિશ્વમૂર્તે કલ્યાણભૂધરધનુર્ધર શૂલપાણે ।
ભર્ગ ત્રિલોચન ભગાક્ષિહરાજરેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૧॥

યે વિષ્ણુવલ્લભ સદાશિવ કાલકાલ કાલાગ્નિરુદ્ર કરુણાકર દીનબન્ધો ।
કર્પૂરગૌર પરમેશ મહેશ્વરેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૨॥

યે વામદેવ ભવભઞ્જન ભૂતિભૂષ ભૂતેશ ખણ્ડપરશો પ્રમથાધિનાથ ।
વિશ્વાધિક ત્રિદશવન્દ્ય સુરેશ્વરેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૩॥

યે ભક્તવત્સલ જટાપટલાબલમ્બિબાલેન્દુખણ્ડ રુચિમણ્ડલમણ્ડિતાઙ્ગ ।
રત્નસ્ફુરદ્ભુજગરાજવિભૂષણેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૪॥

યે ભીમ ષણ્મુખગુરો મૃગશાવહસ્ત શાર્દૂલચર્મવસનાવ્યય સત્યન્ધ ।
શૈલાધિરાજનિલય ત્રિપુરાન્તકેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૫॥

યે ભીમ રુદ્ર વૃષભધ્વજ વીરભદ્રભદ્રાવતાર ભગવન્ ભવભાવરૂપ ।
નિઃસઙ્ગ નિર્મલ નિરઞ્જન નિર્ગુણેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૬॥

યે કાલકૂટવિષભૂરિભયાર્તદેવસંરક્ષકાદ્ય વિષમાક્ષ સમસ્તસાક્ષિન્ ।
સૂક્ષ્માતિસૂક્ષ્મ શિવ દક્ષમખાન્તકેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૭॥

યે યજ્ઞશાસન વૃષાસન ધર્મરૂપ યજ્ઞાદિકર્મફલદાયક યજ્ઞમૂર્તે ।
સૃષ્ટિસ્થિતિપ્રલયકારણ સાત્વિકેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૮॥

યે નીલલોહિત દિગમ્બર કૃત્તિવાસઃ શ્રીકણ્ઠ શાન્ત નિરુપાધિક નિર્વિકાર ।
મૃત્યુઞ્જયાવ્યય નિધીશ ગણેશ્વરેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૧૯૯॥

યે સોમ સામ્બ શિપિવિષ્ટ જગન્નિવાસ કૈલાસવાસ મુનિહૃત્કમલાધિવાસ ।
સોમાવતંસ શિતિકણ્ઠ શિવાપ્રિયેતિ મામર્ચયન્ત્યનુવદન્તિ ત એવ ધન્યાઃ ॥ ૨૦૦॥

(ફલમ્)
મન્નામામૃતપાયિનઃ સ્વજનનીસ્તન્યં પુનઃ સર્વથા
નો કાઙ્ક્ષન્તિ ન ચાપ્નુવન્તિ સતતં મત્પાદપદ્માર્ચકાઃ ।
મલ્લિઙ્ગાર્ચનતત્પરાઃ મમ હિતા મલ્લોક એવાનિશં
સન્તિષ્ઠન્તિ નિરસ્તદુઃખનિકરા મદ્ભક્તવર્યા મુદા ॥ ૨૦૧॥

મલ્લિઙ્ગસમ્પૂજનસક્તચિત્તા મદ્ભક્તપૂજાર્થમુપાત્તવિત્તાઃ ।
મન્નામસઙ્કીર્તનપૂતચિત્તાઃ વસન્તિ મન્નામસુધૈકચિત્તાઃ ॥ ૨૦૨॥

સન્તઃ ક્વચિત્સન્તિ નિશાન્તમીશં સ્વાન્તઃસ્થિતં સન્તતમર્ચયન્તઃ ।
મામેવ વિશ્વેશમનન્તમાદ્યમવેદ્યમેકં નિગમાન્તવેદ્યમ્ ॥ ૨૦૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવનિર્દિષ્ટ શિવવન્દના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧ । ૧૮૯-૨૦૨॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 1 . 189-202..

Notes:
The source text has a numbering error from shloka 194 onwards that has been rectified for this webpage.

Proofread by Ruma Dewan

*Shivanirdishta Shivavandana*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*